| छन्दसां वृत्तिनामानि । | छन्दसां लक्षणगणाः । | छन्दसामुदाहरणानि । |
|---|---|---|
| प्रमिताक्षरा | प्रमिताक्षरा सजससैः कथिता ।।ऽ,।ऽ।,।।ऽ,।।ऽ | अमृतस्य शीकरमिवोद्गिरती<br>रदमौक्तिकांशुलहरीच्छुरिता ।<br>प्रमिताक्षरा सुररिपोर्भणिति-<br>र्व्रजसुभ्रुवामभिजहार मनः ॥ |
| द्रुतविलम्बितम् | द्रुतविलम्बितमाह नभौ भरौ ।।।,ऽ।।,ऽ।।,ऽ।ऽ | तरणिजापुलिने नववल्लवी-<br>परिषदा सह केलिकुतूहलात् ।<br>द्रुतविलम्बितचारुविहारिणं<br>हरिमहं हृदयेन सदा वहे ॥ |
| मन्दाकिनी | ननररघटिता तु मन्दाकिनी ।।।,।।।,ऽ।ऽ,ऽ।ऽ | बलिदमनविधौ बभौ सङ्गता<br>पदनलरुहि यस्य मन्दाकिनी ।<br>सुरनिहितसिताम्बुजस्रङ्निभा<br>हरतु जगदघं स पीताम्बरः ॥ |
| कुसुमविचित्रा | नयसहितौ न्यौ कुसुमविचित्रा ।।।,।ऽऽ,।।।,।ऽऽ | विपिनविहारे कुसुमविचित्रा<br>कुतुकितगोपीमहितचरित्रा ।<br>सुररिपुमूर्त्तिर्मुखरितवंशा<br>चिरमवताद्वस्तरलवतंसा ॥ |
| तामरसम् | इह वद तामरसं नजजा यः ।।।,।ऽ।,।ऽ।,।ऽऽ | स्फुटसुषमामकरन्दमनोज्ञं<br>व्रजललनानयनालिनिपीतम् ।<br>तव मुखतामरसं मुरशत्रो !<br>हृदयतडागविकाशि ममास्तु ॥ |
| मालती<br>यमुनेति क्वापि । | भवति नजावथ मालती जरौ ।।।,।ऽ।,।ऽ।,ऽ।ऽ | इह कलयाच्युतकेलिकानने<br>मधुरससौरभसारलोलुपः ।<br>कुसुमकृतस्मितचारुविभ्रमा<br>मलिरपि चुम्बति मालतीं मुहुः ॥ |
| मणिमाला<br>अस्याः षड्वर्णैर्यतिः । | त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः<br>ऽऽ।,।ऽऽ,ऽऽ।,।ऽऽ | प्रह्वामरमौलौ रत्नोपलकॢप्ते<br>जातप्रतिबिम्बा शोणा मणिमाला ।<br>गोविन्दपदाब्जे राजी नखराणा-<br>मास्तां मम चित्ते ध्वान्तं शमयन्ती ॥ |
| जलधरमाला<br>अस्याश्चतुर्भिरष्टाभिश्च यतिः । | मो भः स्मौ चेज्जलधरमालाब्ध्यन्त्यैः<br>ऽऽऽ,ऽ।।,।।ऽ,ऽऽऽ | या भक्तानां कलिदुरितोत्तप्तानां<br>तापोच्छेदे जलधरमाला नव्या ।<br>भव्याकारा दिनकरपुत्रीकूले<br>केलीलोला हरितनुरव्यात् सा वः ॥ |
| पुटः | वसुयुगविरतिर्नौ म्यौ पुटोऽयम् ।।।,।।।,ऽऽऽ,।ऽऽ | |
| प्रमुदितवदना<br>प्रभेति मल्लिनाथः । गौरीति<br>कौमुदीकारः । | प्रमुदितवदना भवेन्नौ च रौ ।।।,।।।,ऽ।ऽ,ऽ।ऽ | |
| प्रियंवदा | भुवि भवेन्नभजरैः प्रियंवदा ।।।,ऽ।।,।ऽ।,ऽ।ऽ | |
| ललिता | धीरैरभाणि ललिता तभौ जरौ ऽऽ।,ऽ।।,।ऽ।,ऽ।ऽ | |
| उज्ज्वला | ननभरसहिता गदितोज्ज्वला ।।।,।।।,ऽ।।,ऽ।ऽ | |
| नवमालिका | इह नवमालिका नजभयैः स्यात् ।।।,।ऽ।,ऽ।।,।ऽऽ | |
| ललना | पञ्चमुनि भमौ सात् सयुता ललना<br>ऽ।।,ऽऽऽ,।।ऽ,।।ऽ | |
| ललितम् | ललितमभिहितं नौ म्रौ नामतः ।।।,।।।,ऽऽऽ,ऽ।ऽ | |
| द्रुतपदम् | द्रुतपदं भवति नभनयाश्चेत् ।।।,ऽ।।,।।।,।ऽऽ | |
| विद्याधारः | सर्वे मा यस्मिन् सोऽयं विद्याधारः स्यात्<br>ऽऽऽ,ऽऽऽ,ऽऽऽ,ऽऽऽ | |
| पञ्चचामरम् | लघुर्गुरुर्वदन्ति पञ्चचामरम् ।ऽ।ऽ।ऽ।ऽ।ऽ।ऽ | |
| सारङ्गम् | सारङ्गसंज्ञं समस्तैस्तकारैस्तु ऽऽ।,ऽऽ।,ऽऽ।,ऽऽ। | |
| मौक्तिकदाम | समस्तजमीरय मौक्तिकदाम ।ऽ।,।ऽ।,।ऽ।,।ऽ।, | |